# shrI chandra aShTottarashatanAma stotraM 2

# શ્રીચન્દ્રાષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

## Document Information

Text title : chandrAShTottarashatanAmastotram 2

File name : chandrAShTottarashatanAmastotram2.itx

Category : aShTottarashatanAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Gopal Upadhyay gopal.j.upadhyay gmail.com

Proofread by : Gopal Upadhyay gopal.j.upadhyay gmail.com

Description-comments : See corresponding nAmAvalI

Latest update : June 3, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીચન્દ્રાષ્ટોત્તરશતનામસ્તોત્રમ્ ૨

અથ શ્રીચન્દ્રાષ્ટોત્તરશતનામસ્તોત્રમ્ ।
અથ વક્ષ્યે શશિસ્તોત્રં તચ્છૃણુષ્વ મુદાન્વિતઃ ॥ ૧॥
ચન્દ્રોઽમૃતમયઃ શ્વેતો વિધુર્વિમલરૂપવાન્ ।
વિશાલમણ્ડલઃ શ્રીમાન્ પીયૂષકિરણઃ કરી ॥ ૨॥
દ્વિજરાજઃ શશધરઃ શશી શિવશિરોગૃહઃ ।
ક્ષીરાબ્ધિતનયો દિવ્યો મહાત્માઽમૃતવર્ષણઃ ॥ ૩॥
રાત્રિનાથો ધ્વાન્તહર્તા નિર્મલો લોકલોચનઃ ।
ચક્ષુરાહ્લાદજનકસ્તારાપતિરખણ્ડિતઃ ॥ ૪॥
ષોડશાત્મા કલાનાથો મદનઃ કામવલ્લભઃ ।
હંસઃસ્વામી ક્ષીણવૃદ્ધો ગૌરઃ સતતસુન્દરઃ ॥ ૫॥
મનોહરો દેવભોગ્યો બ્રહ્મકર્મવિવર્ધનઃ ।
વેદપ્રિયો વેદકર્મકર્તા હર્તા હરો હરિઃ ॥ ૬॥
ઊર્દ્ધ્વવાસી નિશાનાથઃ શૃઙ્ગારભાવકર્ષણઃ ।
મુક્તિદ્વારં શિવાત્મા ચ તિથિકર્તા કલાનિધિઃ ॥ ૭॥
ઓષધીપતિરબ્જશ્ચ સોમો જૈવાતૃકઃ શુચિઃ ।
મૃગાઙ્કો ગ્લૌઃ પુણ્યનામા ચિત્રકર્મા સુરાર્ચિતઃ ॥ ૮॥
રોહિણીશો બુધપિતા આત્રેયઃ પુણ્યકીર્તકઃ ।
નિરામયો મન્ત્રરૂપઃ સત્યો રાજા ધનપ્રદઃ ॥ ૯॥
સૌન્દર્યદાયકો દાતા રાહુગ્રાસપરાઙ્મુખઃ ।
શરણ્યઃ પાર્વતીભાલભૂષણં ભગવાનપિ ॥ ૧૦॥
પુણ્યારણ્યપ્રિયઃ પૂર્ણઃ પૂર્ણમણ્ડલમણ્ડિતઃ ।
હાસ્યરૂપો હાસ્યકર્તા શુદ્ધઃ શુદ્ધસ્વરૂપકઃ॥ ૧૧॥
શરત્કાલપરિપ્રીતઃ શારદઃ કુમુદપ્રિયઃ ।
દ્યુમણિર્દક્ષજામાતા યક્ષ્મારિઃ પાપમોચનઃ ॥ ૧૨॥
ઇન્દુઃ કલઙ્કનાશી ચ સૂર્યસઙ્ગમપણ્ડિતઃ ।

સૂર્યોદ્ભૂતઃ સૂર્યગતઃ સૂર્યપ્રિયપરઃપરઃ ॥ ૧૩॥
સ્નિગ્ધરૂપઃ પ્રસન્નશ્ચ મુક્તાકર્પૂરસુન્દરઃ ।
જગદાહ્લાદસન્દર્શો જ્યોતિઃ શાસ્ત્રપ્રમાણકઃ ॥ ૧૪ ॥

સૂર્યાભાવદુઃખહર્તા વનસ્પતિગતઃ કૃતી ।
યજ્ઞરૂપો યજ્ઞભાગી વૈદ્યો વિદ્યાવિશારદઃ ॥ ૧૫॥
રશ્મિકોટિર્દીપ્તિકારી ગૌરભાનુરિતિ દ્વિજ ।
નામ્નામષ્ટોત્તરશતં ચન્દ્રસ્ય પાપનાશનમ્ ॥ ૧૬॥
ચન્દ્રોદયે પઠેદ્યસ્તુ સ તુ સૌન્દર્યવાન્ ભવેત્ ।
પૌર્ણમાસ્યાં પઠેદેતં સ્તવં દિવ્યં વિશેષતઃ ॥ ૧૭॥
સ્તવસ્યાસ્ય પ્રસાદેન ત્રિસન્ધ્યાપઠિતસ્ય ચ ।
સદાપ્રસાદાસ્તિષ્ઠન્તિ બ્રાહ્મણાશ્ચ દ્વિજોત્તમ ॥ ૧૮॥
શ્રાદ્ધે ચાપિ પઠેદેતં સ્તવં પીયૂષરૂપિણમ્ ।
તત્તુ શ્રાદ્ધમનન્તઞ્ચ કલાનાથપ્રસાદતઃ ॥ ૧૯॥
દુઃસ્વપ્નનાશનં પુણ્યં દાહજ્વરવિનાશનમ્ ।
બ્રાહ્મણાદ્યાઃ પઠેયુસ્તુ સ્ત્રીશૂદ્રાઃ શૃણુયુસ્તથા ॥ ૨૦॥

ઇતિ બૃહદ્ધર્મપુરાણાન્તર્ગતં શ્રીચન્દ્રાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay gmail.com

*shrI chandra aShTottarashatanAma stotraM 2*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*